यस्मिन्नाराधिता देवी चिप्रं भवति सिद्धिदा ॥
तुङ्गारं महाशङ्खच त्रिकूटं पर्व्वतं तथा ।
विन्ध्या गङ्गा सरिद्यश्च रेवातीरमथापि वा ॥
पयोष्णी अमुराख्या तु अथवा मण्डलेश्वरे ।
महेश्वरराश्मिमे अथवा अमरेश्वरे ॥
वेत्रवत्यास्तटे रम्ये हरिश्चन्द्रे तथा प्रिये ।
सरस्वतीतटे पुण्ये सुगन्धायतनेऽपि वा ।
स्थानेष्वेषु जपं कुर्य्यात् नन्दाहे क्षतमानसः ।
भैरवं शूलभेदञ्च चण्डीमं त्रिपुरान्तकम् ॥
अष्टचक्रं चक्रोच्छासं कपालाचायनामकम् ।
मजाविकं खरोष्ट्राख्यं स्थानान्येतानि वर्जयेत् ॥"
इति देवीपुराणे कुण्डप्रवेशनामाध्यायः ॥
सिद्धेश्वरी, स्त्री, (सिद्धा ईश्वरी ।) देवीविशेषः । यथा,—
"सिद्धां सिद्धेश्वरीं सिद्धविद्याधरगणैर्युताम् ।
मन्त्रसिद्धिप्रदां योनिसिद्धिदां लिङ्गशोभिताम् ॥
इति मुण्डमालातन्त्रे ११ पटले महाविद्यास्तोत्रम् ॥ अपि च ।
"कृष्णेन बलभद्रेण गोपैः कंसजिघांसुभिः ।
सङ्केतकं कृतं तत्र मन्त्रनिश्चयकारकम् ॥
तदा सङ्केतकैः सा च सिद्धा देवी प्रतिष्ठिता ।
सिद्धिप्रदा भोगदा च तेन सिद्धेश्वरी स्मृता ।
सङ्केतकेश्वरीञ्चैव दृष्ट्वा सिद्धिमवाप्नुयात् ॥"
इति वाराहे मथुरापरिक्रमप्रादुर्भावनामाध्यायः ॥
सिद्धौघः,पुं, (सिद्धानामोघः ।) गुरुक्रमविशेषः। यथा, तन्त्रे ।
"अथ तारागुरून् वक्ष्ये दृष्टादृष्टफलप्रदान् ।
ऊर्द्ध्वकेशो व्योमकेशो नीलकण्ठो वृषध्वजः ॥
दिव्यौघाः सिद्धिदा वत्स सिद्धौघान् शृणु यत्नतः ।
वशिष्ठः कूर्म्मनाथश्च मीननाथो महेश्वरः ॥
हरिनाथो मानवौघान् शृणु वक्ष्यामि तद्गुरून् ।
तारावती भानुमती जयाविद्या महोदरी ॥
सुखानन्दः परानन्दः पारिजातः कुलेश्वरः ।
विरूपाख्यः फेरवी च कथितं तारिणीकुलम् ।
आनन्दनाथशब्दान्ता गुरवः सर्व्वसिद्धिदाः ।
स्त्रियोऽपि गुरुरूपाश्च अम्बान्ताः परिकीर्त्तिताः ॥"
इति तन्त्रसारः ॥
अन्यच्च ।
"ब्रह्मानन्दः पूर्णदेवश्चलचित्तश्चलाचलः ।
कुमारः क्रोधनश्चैव तथा च स्वरदीपनः ॥
माया मायावती चैव मानवौघान् शृणु प्रिये ।
वशिष्ठः कूर्म्मनाथश्च मीननाथो महेश्वरः ।
हरिनाथो मानवौघानथ वक्ष्यामि सद्गुरून् ॥"
इति शक्तिरत्नाकरतन्त्रम् ॥
तथा ।
"नारदः काश्यपः शम्भुर्भार्गवः कुलकौशिकः ।
एते पञ्च महादेव सिद्धौघाः परिकीर्त्तिताः ॥"
इति तन्त्रम् ॥

सिध्म, [न्] क्ली, ( सिध + मन् । स च कित् ।) किलासरोगः । इत्यमरः ।२ । ६ । ५३ ॥(यथा, सुश्रुते । २ । ५ ।
"क्षुद्रकुष्ठान्यपि स्थूलारुष्कं महाकुष्ठमेककुष्ठचर्म्मदलं विसर्पः परिसर्पः सिध्म विचर्च्चिका किटिमं पामा रकसा चेति ॥")
सिध्मं,क्ली,(सिध + बाहुलकात् मक् ।)किलासरोगः । इति हेमचन्द्रः ॥ सप्तमहाकुष्ठान्तर्गतकुष्ठरोगविशेषः । तल्लक्षणं यथा,—
"श्वेतं ताम्रं तनु च यद्रजो घृष्टं विमुञ्चति ।
प्रायश्चोरसि तत् सिध्ममलावुकुसुमोपमम् ॥"
इति माधवकरः ॥
त्वङ्मात्रगता सिध्मपुष्पिका इति अलावुपुष्पवत् श्वेतं सिध्मं सिध्मपुष्पिका । महाकुष्ठन्तु सिध्मं धातुप्रविष्टं सिध्मपुष्पिकेतरं श्वेतलोहितवर्णम् एतेन सिध्मस्य द्वैविध्यं सूचितम् । इति विजयरचितादयः ॥
सिध्मपुष्पिका, स्त्री, ( सिध्मस्य किलासस्य पुष्पं विद्यते यस्याः । सिध्मपुष्प + ठन् ।) कुष्ठव्याधिभेदः । सा च त्वङ्मात्रगता अलावुपुष्पवत्श्वेता इति रुग्विनिश्चयटीकायां विजयरचितादयः ॥
सिध्मलः, त्रि, ( सिध्मं अस्यास्तीति । सिध्म + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) किलासी । इत्यमरः । २ । ६ । ६१ ॥ (यथा, वाजसनेयसंहितायाम् । ३० । १७ ।
"विश्वेभ्यो भूतेभ्यः सिध्मलं भूत्यै जागरणमभूत्यै इति ॥" )
सिध्मला,स्त्री,(सिध्ममस्या अस्तीति । लच् । टाप् ।) मत्स्यविकृतिः । इति मेदिनी ॥(औषधविशेषः । तद्यथा,—
"त्वगादिहीनाः संशुद्धाः प्रत्यग्राः शकुलादयः ।
श्लक्ष्णचूर्णीकृतं तेषां शीते पलशतत्रयम् ॥
शतेन कटुतैलेऽस्य व्योषरामठधान्यकैः ।
क्रिमिघ्नदीप्यकनिशाचविकाग्रन्थिकार्द्रकैः ॥
जीरकद्वयवर्षोरसुरसार्ज्जकसिग्रुकैः ।
दशमूलात्मगुप्ताभ्यां मार्कवैर्लवणैस्त्रिभिः ॥
चूर्णितैः पलिकैः सार्द्ध मारणालपरिप्लुतैः ॥
विन्यसेत् स्नेहपाले तु धान्यराशौ पुनर्न्यसेत् ।
सप्तरात्रात् समुद्धृत्य पानभक्षणभोजनैः ।
सिध्मलेयं प्रयोक्तव्या सामे वायौ विशेषतः ॥
भग्नरुग्णाश्च तू हताः कम्पिनः पीठसर्पिणः ।
गध्रसीमग्निसादञ्च शूलगुल्मोदराणि च ।
वलीपलितखालित्यं हन्त्यास्यरमलेन्द्रियाः ॥"
इति वैद्यकचक्रपाणिसंग्रहे आमवाताधिकारे)
सिध्मवान्,[त्]त्रि, (सिध्ममस्त्यस्येति । सिध्म + पक्षे मतुप् । मस्य वः । ) किलासरोगविशिष्टः इति सिध्मशब्दादस्त्यर्थे वतुप्रत्ययेन निष्पन्नः ॥
सिध्मा, स्त्री, किलासरोगः । इति हेमचन्द्रः ॥
सिध्यः, पुं, (सिध्यन्त्यस्मिन्नर्था इति । सिध + "पुष्यसिध्यौ नक्षत्रे ।" ३ । १ । ११६ । इति क्यप्प्रत्ययेन निपातितः ।) पुष्यनक्षत्रम् । इत्यमरः । १ । ३ । २२ ॥

सिध्रः, पुं, साधुः । वृक्षः । इत्युणादिकोषः ॥
सिध्रका,स्त्री, (सिध्र + स्वार्थे कन् । अभिधानात् स्त्रीत्वम् । ) वृक्षविशेषः । इत्यमरः ।२।४।८॥ सेधति रोगहन्तृत्वमिति सिध्रमा । सीध इति ख्यातो वृक्षः । षिधु गत्यां नाम्नीति रक् ततः स्वार्थे कः संज्ञाविधेरनित्यत्वात् न इत् । इति भरतः ॥
सिध्रकावणं,क्ली,(सिध्रकाणां वनमिति । णत्वम् ।) देवोद्यानम् । इति त्रिकाण्डशेषः ॥
सिनं,क्ली,(सिनोति बध्नाति आत्मानमिति । षिञ् बन्धने + "इण्षिञ्जीति ।" उणा० ३ । २ । इति नक् । ) शरीरम् । इति संक्षिप्तसारोणादिवृत्तिः ॥ (अन्नम् । इति निघण्टुः ।२।७॥
सिनः, पुं, (सिनोतीति । षिञ् बन्धने + "इण् सिञ्जीति ।" उणा० ३ । २ । इति नक् । ) ग्रासः । इति मुग्धबोधव्याकरणम् ॥ काणः । इति केचित् ॥ शुक्लगुणविशिष्टे, त्रि ॥
सिनी,स्त्री,शुक्लगुणविशिष्टा । यथा । श्वेता सिता सिनी श्येनी । इति व्याड़िः । इति सिनीवालीशब्दटीकायां भरतः ॥
सिनी(वा)वाली, स्त्री, (सिनी शुक्ला बाला चन्द्रकला अस्यामिति । यद्वा, सिन्या शुक्लया चन्द्रकलया बल्यते मिश्यते या । वल मिश्रणे + घञ् । ततो ङीष् । ) दृष्टेन्दुकलामावास्या । इत्यमरः । १ । ४ । ८ ॥ सा चतुर्द्दशीयुक्तामावस्या । सिनी श्वेता बाला चन्द्रकलास्यां सिनीवाली नदादित्वादीप् । इति तट्टीकायां भरतः ॥ ( यथा, भागवते । ४ । १२ । ४८ ।
"पौर्णमास्यां सिनीवाल्यां द्वादश्यां श्रवणेऽथवा ॥".)
दुर्गा । इति मेदिनी ॥
सिन्दुकः, पुं,सिन्दुवारवृक्षः । इत्यमरः ।२।४।६८॥ (तथास्य पर्य्यायगुणाः ।
"सिन्दुवारः श्वेतपुष्पः सिन्दुकः सिन्दुवारकः॥
नीलपुष्पी तु निर्गुण्डी शेफाली सुवहा च सा ।
सिन्दुकः स्मृतिदस्तिक्तः कषायः कटुको लघुः॥
केश्यो नेत्रहितो हन्ति शूलशोथाममारुतान् ।
क्रमिकुष्ठारुचिश्लेष्मज्वरान्नीलापि तद्विधा ।
सिन्दुवारदलं जन्तु-वातश्लेष्महरं लघु ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
सिन्दु(न्धु)वारः,पुं, सिन्धुं गजमदं वारयति तिक्तत्वात् । वृ + अण् । पाचिको धस्य दः ।) वृक्षविशेषः । निसिन्दा इति भाषा । इनकुर इति च क्वचित् । तत्पर्य्यायः । सिन्दुकः २ इन्द्रसुरिसः३ निर्गुण्डी४ इन्द्राणिका५ । इत्यमरः। २।४।६८॥ सिन्धुकः ६ सिन्धुवारकः७ इन्द्राणी ८ पौलोमी९ शक्राणी १० कासनाशिनी११। इति रत्नकोषः ॥ श्वेतपुष्पः १२ सिन्दुवारकः १३ स्थिरसाधनकः १४ अनन्तः १५ सिद्धकः १६ अर्थसिद्धकः १७ । अस्य गुणाः । कटुत्वम्। तिक्तत्वम् । कफवातक्षयकुष्टकण्डूतिशूलनाशित्वम् । कायसिद्धिदत्वञ्च । इति राजनिर्घण्टः॥